# BACHELOR OF ARTS EXAMINATION, 2024

**( 3rd Year, 5th Semester)**

**SANSKRIT (HONOURS)**

**COURSE : XI**

**( Vedic Texts and Vedic Grammar )**

*Full Marks* : 30 *Time* : 2 Hours

*The figures in the margin indicate full marks.*

सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च प्रदेयम्।

**1.** अधस्तनयोः प्रश्नयोः **एकस्य** उत्तरं देयम्। 6×1=6

*(a)* ऋग्वेदीये सूर्यसूक्ते (1.115) वर्णितं सूर्यदेवतायाः स्वरूपं सम्यक् उपस्थापनीयम्।

*(b)* ऐतरेयब्राह्मणस्य शुनःशेपकथान्तर्गतः इन्द्र–रोहितसंवादः संक्षेपतः वर्णनीयः।

**2.** अधोलिखितः मन्त्रः ऋषिच्छन्दोदेवतानिर्देशपुरःसरं सायणभाष्यानुसारेण व्याख्यायताम्। 4

उप॑ त्वाग्ने दि॒वेदि॑वे॒

दोषा॑वस्तर्धि॒या व॒यम्।

नम॒ो भर॑न्त॒ एम॑सि॥

**3.** अधोनिर्दिष्टयोः विनियोगवाक्ययोः **एकस्य** व्याख्या करणीया। 4×1=4

(*a*) सूर्योदयादूर्ध्वं सौर्याणि सूक्तानि शंसनीयानि।

(*b*) अतिमूर्तिनाम्न्येकाहे शुनासीर्ये पर्वणि च सूर्यस्य हविषः 'चित्रं देवानाम्' इत्येषा याज्या।

**4.** निम्नोद्धृतेषु पदेषु **एकस्य** सूत्रनिर्देशपुरःसरं स्वरसञ्चरणं करणीयम्। 2×1=2

ईळे। पुरोहितम्। ऋत्विजम्।

**5.** अधःस्थितानां पदानां **एकस्य** ससूत्रं पदसाधनं करणीयम्। 2×1=2

देवम्। यज्ञस्य । होतारम्।

**6.** अधोलिखितानां वैदिकपदानां द्वयोः लौकिकसंस्कृतरूपं प्रदेयम्। 1×2=2

नयता। अक्षासः । मध्वा।

**7.** अधस्तनयोः प्रश्नयोः **एकस्य** उत्तरं देयम्। 6×1=6

(*a*) वैदिकभाषायाः शब्दरूपवैचित्र्यमवलम्ब्य लघुकायः प्रबन्धः लेखनीयः।

(*b*) वैदिकभाषायाम् उपसर्गाणां प्रयोगम् अनुसृत्य संक्षिप्तः निबन्धः विरचनीयः।





**8.** निम्नलिखितस्य ऋग्वेदीयमन्त्रस्य पदपाठः प्रदर्शनीयः। 4

अ॒ग्ने यं य॒ज्ञम॑ध्व॒रं

वि॒श्वतः॑ परि॒भूरसि॑।

स इद्दे॒वेषु॑ गच्छति।

★★★